# Kailasodyanavarnanam

# કૈલાસોદ્યાનવર્ણનમ્

## Document Information

Text title : Kailasodyanavarnanam

File name : kailAsodyAnavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | 1 kailAsodyAnavarNanam | 15-67 ||

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2024

*sanskritdocuments.org*

# કૈલાસોદ્યાનવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઈશાખ્યે)

સુબ્રહ્મણ્ય ઉવાચ ।

જૈગીષવ્ય મહાભવ્ય હવ્યવાહસમપ્રભ ।
દિવ્યં કથાનકં શમ્ભોર્નાકિભિર્મુનિભિર્ગણૈઃ ॥ ૧૫॥

શ‍ૃણ્વપર્ણાપતેસ્તૂર્ણં પૂર્ણં કર્ણરસાયનમ્ ।
(શ‍ૃણ્વપર્ણાપતેસ્તૂર્ણં સન્તારણકરં શુભમ્ ।)
ભવાર્ણવનિમગ્નાનાં સન્તીર્ણતરિમદ્ભુતામ્ ॥ ૧૬॥

પુરા કૈલાસતદને મદનાન્તકરો હરઃ ।
રત્નપ્રાસાદસમ્બાધે સૌધગોપુરમણ્ડિતે ॥ ૧૭॥

શિખણ્ડિતાણ્ડવયુતે ડમ્બરાડમ્બરૈર્યુતે ।
ઉદ્યદ્ભાસ્કરસઙ્કાશવિદ્રુમસ્તમ્ભમણ્ડપે ॥ ૧૮॥

નાનાતરુગણાપારફુલ્લપુષ્પવિરાજિતે ।
તત્પુષ્પસુન્દરતરપરાગાવૃતમારુતે ॥ ૧૯॥

નાનાપક્ષિરુતાપારનન્દિતાનન્દકન્દરે ।
ચન્દનાનન્દસુભગગન્ધમેદુરપૂજિતે ॥ ૨૦॥

પર્વતાખર્વસર્વસ્વશર્વરીનાથસપ્રભે ।
શિખરે વિજહારેશો હરો ગૌર્યા સદાર્યયા ॥ ૨૧॥

મુદા હૃદા તદા દેવો દર્શયન્ તદ્વનસ્થલીમ્ ।
નાનાપુષ્પતરુચ્છન્નામભ્રભ્રાન્તિનિવારિણીમ્ ॥ ૨૨॥

હરિણીગણસંયુક્તાં પતત્પત્રવરૈર્યુતામ્ ।
નિયુતાયુતવિસ્તીર્ણાં સઙ્કીર્ણાં મૃગપક્ષિભિઃ ॥ ૨૩॥

ભ્રમન્માતઙ્ગસારઙ્ગાં રત્નગઙ્ગાતટોજ્જ્વલામ્ ।

તુઙ્ગશાઙ્ગમહાલિઙ્ગસઙ્ગ સૌધોજ્જ્વલત્પ્રભામ્ ॥ ૨૪॥

ભાવિતું મનસા સર્વૈરશક્યાં તાં વનસ્થલીમ્ ।
ઉત્ફુલ્લહલ્લકાક્રાન્તાં ક્રૌઞ્ચસારસસેવિતામ્ ॥ ૨૫॥

પતઙ્ગાંશુસમુત્ફુલ્લરક્તાબ્જવરશોભિતામ્ ।
પરાગરાગસ્વચ્છોદાં તટપ્રાસાદશોભિતામ્ ॥ ૨૬॥

તત્પ્રાસાદાગ્રમધ્યસ્થસિંહ્માસનવરાશ્રિતઃ ।
દિવ્યાઙ્ગસઙ્ગસુભગો ભર્ગો દેવ્યા સમન્વિતઃ ॥ ૨૭॥

ચન્દ્રાપીડો મૃડો ગૌર્યા દર્શયામાસ તદ્વનમ્ ॥ ૨૮॥

સ્વસ્યાસ્યમાદર્શતલે દદર્શ
શર્વોઽથ ગૌર્યાપ્રતિબિમ્બિતં વનમ્ ।
સર્વૈકનાથઃ સ હિ વિશ્વનાથો
વિશ્વં યથા સ્વાત્મપથં કરોતિ ॥ ૨૯॥

મત્તદ્વિરેફકલહંસકુલાભિરામં
પુંસ્કોકિલાકલિતકાકલિરાગમુક્તમ્ ।
ઉત્પુચ્છગુચ્છસમરૈશ્ચમરૈરુપેતં
ત્ર્યક્ષો મુદૈક્ષત વનં શિવયા સમેતઃ ॥ ૩૦॥

શારદમુદિરાભફુલ્લમલ્લી-
સુમગન્ધોદ્ધતમેદુરં વનાન્તમ્ ।
સ દિનાન્તેઽથ વસન્તવાસરે
શિખરે શૈલવરે દદર્શ શર્વઃ ॥ ૩૧॥

ભલ્લાલિઙ્ગિતકુન્દવલ્લિકલિકે(કં)પ્રોત્ફુલ્લમલ્લીગણે(ણં)
તજ્જાતાલદિવ્યગન્ધસુમહાબન્ધાન્ધસન્મારુતં
જિઘ્રન્ સામ્બશિવસ્તદાસ્ત શિખરે કૈલાસભૂભૃદ્વરે ॥ ૩૨॥

તમાલતિલકાલકં તિલકિતાચ્છસત્કેતકં
પ્રફુલ્લવનરાજિકં શિવપદાબ્જસંસેવકમ્ ।
દદર્શ શિખરાવૃતં હરિતપીતરીતીયુતં
પ્રફુલ્લનગસંયુતં ગિરિમથૈક્ષતામ્બાસુતઃ ॥ ૩૩॥

કદમ્બજસુનિમ્બજૈઃ સફલબિમ્બવલ્લીવૃતૈઃ
સદમ્બુજસરોવરૈર્વૃતમપારજમ્બૂદ્રુમૈઃ ।

હૃદમ્બરમુદં વ્યધાત્ વરદિશામ્બરોઽહસ્કર-
ધનઞ્જયનિશાકરપ્રકટલોચનોસ્તામ્બયા ॥ ૩૪॥

(ધનઞ્જયનિશાકર પ્રકટ ચક્ષુરાસ્તામ્બયા) ॥ ૩૪॥

સુનીપતરુ સંવૃતં પ્રથિતતાપપાપાપહં
અપાયશરણં વનં તગરધૂપસમ્મોદનમ્ ।
ચિરન્તનતપોવનં શિવવિહારતઃ પાવનં
દદર્શ કિલકાનનં સ શિવયા સ્વકીયાનનમ્ ॥ ૩૫॥

પ્રફુલ્લનાનાવિધગુલ્મશોભિતં
લતાવિતાનાદિમનોરમં વનમ્ ।
વિરૂઢશષ્પૈઃ પરિતઃ પ્રિયઙ્ગુભિઃ
સુપુષ્પિતં કણ્ટકિતં ચ કેતકૈઃ ॥ ૩૬॥

તમાલગુચ્છૈર્નિચિતં સુગન્ધિભિ-
ર્નિકામપુષ્પૈર્વકુલૈશ્ચ સર્વશઃ ।
અશોકપુન્નાગવનૈઃ સુપુષ્પિતૈઃ
દ્વિરેફમાલાકુલપુષ્પસઞ્ચયૈઃ ॥ ૩૭॥

ક્વચિત્પ્રફુલ્લામ્બુજરેણુરૂષિતં
વિહઙ્ગમૈશ્ચારુકલપ્રણાદિભિઃ ।
વિનાદિતં સારસહંસપઙ્ક્તિભિઃ
પ્રમત્તનત્યૂહરુતૈશ્ચ શોભિતમ્ ॥ ૩૮॥

ક્વચિચ્ચ ચક્રાહ્વરુતૈર્વિનાદિતં
ક્વચિચ્ચ કારણ્ડવનાદમણ્ડિતમ્ ।
ક્વચિચ્ચ મત્તાલિકુલાકુલીકૃતં
મદાકુલાભિર્ભ્રમરાઙ્ગનાદિભિઃ ॥ ૩૯॥

નિષેવિતં ચારુસુગન્ધિપુષ્પં
ક્વચિત્સપુષ્પૈઃ સહકારવૃક્ષૈઃ ।
લતોપગૂઢૈસ્તિલકૈસ્તમાલૈઃ
પ્રગીતવિદ્યાધરસિદ્ધચારણમ્ ॥ ૪૦॥

વિવસ્વત્પ્રભાપુઞ્જગુઞ્જાફલાઢ્યં
વિરાજત્સુધાંશોઃશશશોભિમધ્યમ્ ।

ગિરાવદ્રિવૃન્દપ્રભાનીલવસ્ત્રં
વિયદ્વ્યાધવેશ્મેવ વિશ્વં વિભાતિ ॥ ૪૧॥

પ્રવૃત્તનૃત્તાનુગતોઽપ્સરોગણં
પ્રહૃષ્ટનાનાવિધપુષ્ટસન્મૃગમ્ ।
પ્રમત્તહારીતકુલોપપન્નં
મૃગેન્દ્રનાદાકુલસન્નશમ્બરમ્ ॥ ૪૨॥

કૂચિચ્ચ રુદ્રોરુકદમ્બમૃગ્ય-
વિલૂનશષ્પાઙ્કુરવાપ્યમણ્ડિતમ્ ।
પ્રફુલ્લસદ્ધલ્લકનીલકોત્પલૈઃ
સત્પુણ્ડરીકૈઃ કમલૈશ્ચ શેભિતમ્ ॥ ૪૩॥

વિટપનિચયનીલં નીલકણ્ઠાભિરામં
મદમુદિતવિહઙ્ગવ્રાતનાદાભિરામમ્ ।
કુસુમિતતરુશાખાનીલમત્તદ્વિરેફં
નવકિસલયશોભાશોભિતપ્રાન્તશાખમ્ ॥ ૪૪॥

ક્વચિચ્ચ દન્તિક્ષતચારુવીરુધં
વેણુદ્રુમૈર્રુદ્ધમરીચિમાર્ગમ્ ।
ક્વચિલ્લતાઽઽલિઙ્ગિતફુલ્લવૃક્ષં
ઋક્ષૌઘસન્દારિતમૂલભાગમ્ ॥ ૪૫॥

ક્વચિદ્વિલાસાલસગામિનીભિ-
ર્નિષેવિતં રુદ્રગણાઙ્ગનાભિઃ ।
પારાવતધ્વનિભિરૂર્જિત ચારુશૃઙ્ગ-
મભ્રઙ્કુષૈઃસિતસિતાયિતપર્વતાગ્રૈઃ ॥ ૪૬॥

સઙ્કીર્ણપુષ્પનિકરપ્રવિભક્તભાસૈ-
ર્વિભ્રાજિતૈરભ્રસમૈશ્ચ શૃઙ્ગૈઃ ।
પ્રાન્તોદ્ભવાગરુ દવોદ્ભવધૂમરેખા-
લેખામુખાઘ્રાણસુખૈકસન્મુખમ્ ॥ ૪૭॥

વૃક્ષાગ્રસઙ્કુલિતપુષ્પવિચિત્રપઙ્ક્તિ-
સમ્બદ્ધગુલ્મવિહગૈર્ગહનં દદર્શ ॥ ૪૮॥

તુઙ્ગાગ્રૈર્નીલપુષ્પસ્તબકભરનતપ્રાંશુશાખાશિખાભિ-

ર્માલાપ્રાન્તાન્તલીનશ્રુતિસુખજનનૈઃ કૂજિતં પક્ષિસઙ્ઘૈઃ ।
રાત્રૌ ચન્દ્રસ્ય ભાસા કુસુમિતતિલકૈ (રેકતઃ શ્યામકાન્તં)
છાયાસુપ્તપ્રબુદ્ધસ્થિતહરિણગણાલુપ્તદૂર્વાઙ્કુરાગ્રમ્ ॥ ૪૯ ॥

હંસાનાં પક્ષવાતપ્રચલિચકમલસ્વચ્છસમ્પૂર્ણતોયં
તત્તીરપ્રથિતોરુચારુકદલી(પાલી)નૃત્યન્મયૂરમ્પુરઃ ।
માયૂરૈઃ પક્ષચન્દ્રૈઃ ક્વચિદવપતિતૈરર્ચિતક્ષ્માપ્રદેશં
દેશોઽભાસે વિલીનપ્રમુદિતવિગલત્સાન્દ્રકસ્તૂરિકૈણમ્ ॥ ૫૦ ॥

સારઙ્ગૈરુપશોભિસત્પ્રદેશં
પ્રચ્છન્નં કુસુમચયૈઃ ક્વચિદ્વિકીર્ણમ્ ।
હૃષ્ટાભિઃ ક્વચિદપિ રુદ્રકાઙ્ગનાભિ-
ર્વીણાભિઃ સુમધુરગીતરમ્યષણ્ડમ્ ॥ ૫૧ ॥

આમૂલાત્ફલનિચિતૈકચિદ્વિશાલૈ-
રુત્તુઙ્ગૈઃ પનસમહીરુહૈરુપેતમ્ ।
ફુલ્લાવિમુક્તકલાતાગૃહલીનબર્હિ-
કેકારવાક્રમિતતદ્ગરિમૂલસાનુમ્ ॥ ૫૨ ॥

રમ્યપ્રિયઙ્ગુ તરુમઞ્જરિસક્તશૃઙ્ગં
ભૃઙ્ગાવલી કજ્જલિતામ્રકદમ્બપુષ્પમ્ ।
પુષ્પોત્તરાનિલવિધૂતફણીન્દ્રવક્ત્ર-
સત્પારણં વિદધતં ચ નમત્યુદારમ્ ॥ ૫૩ ॥

ગુલ્માન્તરપ્રસૃતગીત . . . . .
નેત્રાન્તરાગલદથાશ્રુજશીતવારિ ।
ચણ્ડાંશુજાલકલશે તિલકે મનોજ્ઞૈઃ
સિન્દૂર કુઙ્કુમકુસુમ્ભનિભૈરશોકૈઃ ॥ ૫૪ ॥

ચામીકરાભપરિફુલ્લસુકર્ણિકારૈ-
ર્મન્દારસુન્દરસુવૃત્તકચારુશાખી ।
કીલાલજાતાનિલલોલમૂલ-
મૃણાલમૌલિસ્થસુપદ્મજાલમ્ ॥ ૫૫ ॥

વાતાહતિ પ્રોદ્ધતપત્રઘર્ઘરં
વિરાવિતાલં સુતમાલપિપ્પલમ્ ।
ત્યક્તાઃ શિવેનેતિ ચ કેતકેન

સઙ્કેતભાજોઽત્ર વસન્તિ કેતકાઃ ॥ ૫૬॥

નાગાનુબન્ધેન વિરાગમપ્યહો
શિવાઙ્ગમપ્યાતનુતે પરાગૈઃ ।
સદ્વારણં વારણસઙ્ઘમત્ર
મન્દારસન્દારિતમેઘમાલમ્ ॥ ૫૭॥

વટં સટાભિર્જટિલપ્રભં સદા
વૃતં ચ ખેદારણકોવિદારમ્ ।
કૈલાસમૌલિકૃતમાલતમાલજાલં
તક્કોલહિન્તાલરસાલજં ફલમ્ ॥ ૫૮॥

અઙ્કોલનારેલફલૈર્વિલોલં
કૃતાલવાલં વકુલં વિભાતિ ।
પુન્નાગનાગસરલાર્જુનચમ્પકાઢ્યં
સત્પાટલીપટલગન્ધસુગન્ધિતાશમ્ ॥ ૫૯॥

સચ્છિંશુપાબદરશાલ્મલિકિંશુકાઢ્યં
શોકાપહારિભિરશોકપરમ્પરાઢ્યમ્ ।
કપિત્થતિન્ત્રિણીબકૂલકાશ્મારશેખરં
સુલોધ્રભદ્રકામ્રકૈઃ સુફુલ્લદાડિમીફલમ્ ॥ ૬૦॥

સુમાતુલિઙ્ગરઙ્ગકં વિભાતિ તદ્વનં પરં
સુરાદનામલક્યપૂગપૂગજમ્બુકં વનમ્ ।
કદલ્યયૂધિકાવૃતં સમીક્ષ્ય ચામ્બયા વસન્ ॥ ૬૧॥

હરિત્પ્રશસ્તતરહસ્તવિશસ્તશાખમ્ ।
વાતાવધૂતસરધાદિગલત્ફલાઢ્યમ્ ॥ ૬૨॥

ગોલાઙ્ગૂલસહસ્રકપ્રતિપતજ્જમ્બૂફલાનીયુતમ્ ।
ભ્રાજદ્ભૂમિતલં દ્વિરેફબહુલં સંરાજતે તદ્વનમ્ ॥ ૬૩॥

ઇરિણં ખરકિરણૈરરુણં
તત્પ્રવિભાતિ તલં ચ વૈ ગિરીન્દ્રે ।
સુદરિદ્રે વિષયા યથાઽફલા-
સ્તૃણમાત્રં નહિ રોહતે તત્ર ॥ ૬૪॥

રાજીવરાજઃ ઇનરાડ્ગિરીશં

નીરાજતીવ પ્રવિભાતિ તદ્ગિરૌ ।
કોલોરુદંષ્ટ્રાભિવિશસ્તમુસ્તા-
માર્ષ્ટીવ સઙ્ઘૈશ્ચ શિલાતલાભૂઃ ॥ ૬૫॥

સકલભુવનકર્તા લોકનાથસ્તદાનીં
તુહિનશિખરિપુત્ર્યા સાર્ધમિષ્ટૈર્ગણેન્દ્રૈઃ ।
વિવિધતરુવિશાલં મત્તહૃષ્ટાન્યપુષ્ટં
ઉપવનમતિરમ્યં દર્શયમાસ દેવ્યૈ ॥ ૬૬॥

(પુષ્પૈર્વન્યૈઃ સુભક(સુરભિ)કુસુમૈ)
પુષ્પૈર્વન્યૈઃ શુભક(વિવિધ)કુસુમૈર્ગન્ધિતૈસ્તદ્ગિરીન્દ્રે
દેવીં દિવ્યામુપવનગતાં ભૂષયામાસ સખ્યઃ ।
સા ચાપ્યેવં તુહિન ગિરિજા શઙ્કરં દેવદેવં
વન્યૈઃ પુષ્પૈઃ પશુવરપતિં ભૂષયામાસહૃષ્ટા ॥ ૬૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કૈલાસોદ્યાનવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશાખ્યઃ દ્વાદશમાંશઃ । ૧ કૈલાસોદ્યાનવર્ણનમ્ । ૧૫-૬૭ ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . 1 kailAsodyAnavarNanam . 15-67 ..

Notes:

Subrahmaṇya સુબ્રહ્મણ્ય narrates (to Jaigīṣavya જૈગીષવ્ય) about the Udyānam ઉદ્યાનમ્ at Kailāsa કૈલાસ, where Śiva શિવ and Gaurī ગૌરી spend their time together.

Proofread by Ruma Dewan

*Kailasodyanavarnanam*

pdf was typeset on December 28, 2024

Please send corrections to *sanskrit@cheerful.com*